## द्वादशः पाठः

# सदाचारः

## (आदर्श दिनचर्या का प्रकाशन)

(जीवन में सदाचार का महत्त्व सभी संस्कृतियों में माना गया है। सदाचार के दो अर्थ किये गये हैं। यद्यपि उनमें विशेष अन्तर नहीं है। अच्छे आचरण को सदाचार कहते हैं - सन् आचारः। दूसरे अर्थों में सज्जनों के आचार-व्यवहार को **सदाचार** कहा जाता है - **सताम् आचारः**। बालक अनुकरण से सदाचार की शिक्षा प्राप्त करते हैं। आस-पास उचित व्यवहार करने वाले लोग हों तो सदाचार स्वतः आ जाता है। फिर भी प्राचीन शास्त्रों में लिखित रूप से सदाचार के उपदेश दिये गये हैं। प्रस्तुत पाठ में जीवन में व्यवहार करने योग्य उपदेशों का संकलन धर्मशास्त्र, पुराण तथा आयुर्वेद के ग्रन्थों से किया गया है।)



1. नापृष्टः कस्यचिद् ब्रूयात् न चान्यायेन पृच्छतः।
   जानन्नपि हि मेधावी जडवल्लोकमाचरेत्॥

2. अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
   चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्॥



Developed by: ABSOL www.absol.in

3. वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद् यदुत्तरम् ।।

4. ब्राह्मे मुहूर्ते बुध्येत स्वस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्वर्त्य कृतनित्यक्रियो भवेत् ।।

5. आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्याः पुंसा कल्याणकामिना ।।

6. विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ।।

7. सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः ।
श्रद्धावान् अनसूयश्च शतं वर्षाणि जीवति ।।

8. सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ।
योऽर्थे शुचिः स हि शुचिः न मृद्वारिशुचिः शुचिः ।।

## शब्दार्थः

**नापृष्टः** (न + अपृष्टः) = बिना पूछे नहीं

**कस्यचित्** = किसी का/ की/ के

**ब्रूयात्** = बोलना चाहिए

**चान्यायेन** (च + अन्यायेन) = और अन्याय / जबरदस्ती से

**पृच्छतः** = पूछते हुए का

**जानन्नपि** (जानन् + अपि) = जानता हुआ भी

**जडवल्लोकमाचरेत्** = मूर्ख की तरह संसार में आचरण करना चाहिए

(जडवत् + लोकम् + आचरेत्)

**अभिवादनशीलस्य** = अभिवादन करने वाले का

**वृद्धोपसेविनः** (वृद्ध+उपसेविनः) = बूढ़ों की सेवा करने वालों का/की/के

**वर्धन्ते** = बढ़ते हैं

**वयः** = उम्र, आयु (Age)

**वित्तं** = धन

**बन्धुः** = सगा-संबंधी, बान्धव, भाई

**मान्यस्थानानि** = आदरणीय, सम्मान के पात्र

**गरीयो** (गरीयः) = श्रेष्ठ, बढ़कर

**यदुत्तरम्** (यत् + उत्तरम्) = जो बाद में हैं

**ब्राह्मे** = ब्रह्मवेला में, सूर्योदय से पूर्व के समय में

**मुहूर्ते** = वेला में, 1 मुहूर्त = 24 मिनट

**बुध्येत** = जागना चाहिए

**रक्षार्थमायुषः** = आयु की रक्षा के लिए

**निर्वर्त्य** = पूरा करके / सम्पन्न करके

**कृतनित्यक्रियः** = जिसने नित्य क्रिया कर ली हो (ऐसा व्यक्ति)

| | | |
|---|---|---|
| **आचार्यः** | = | गुरु, शिक्षक |
| **नार्तेनाप्यवमन्तव्याः** | = | आर्त (विवश/बेचैन/पीड़ित) होकर भी |
| (न+आर्तेन+अपि+अवमन्तव्याः) | | अपमान नहीं करना चाहिए । |
| **पुंसा** | = | व्यक्ति द्वारा |
| **कल्याणकामिना** | = | कल्याण चाहने वाले |
| **विषादप्यमृतम्** (विषात्+अपि+अमृतम्) | = | जहर से भी अमृत |
| **ग्राह्यम्** | = | ग्रहण करना चाहिए, लेना चाहिए |
| **बालादपि** (बालात् + अपि) | = | बच्चे से भी |
| **सुभाषितम्** | = | अच्छे वचन |
| **अमित्रादपि** (अमित्रात् + अपि) | = | शत्रु से भी |
| **काञ्चनम्** | = | सोना, स्वर्ण को |
| **यः** | = | जो |
| **सर्वलक्षणहीनोऽपि** | = | सभी लक्षणों से हीन भी |
| **सदाचारवान्** | = | अच्छे आचरण वाला |
| **अनसूयश्च** (अन् + असूयः + च) | = | और ईर्ष्यारहित/डाह न करनेवाला |
| **शौचानामर्थशौचम्** (शौचानाम् + अर्थशौचम्) | = | पवित्रताओं में धन की पवित्रता (ईमानदारी) |
| **स्मृतम्** | = | कहा गया है |

| | | |
|---|---|---|
| शुचि: | = | पवित्र |
| हि | = | निश्चय ही |
| मृद्वारि | = | मिट्टी एवं जल |
| सद्वृत्तम् | = | अच्छा व्यवहार |
| अमेध्यादपि | = | अपवित्र से भी |
| (अमेध्यात्+अपि) | | |
| काञ्चनम् | = | सोना (स्वर्ण) को |

## व्याकरणम्

### सन्धिविच्छेद:

| | | |
|---|---|---|
| नापृष्ट: | = | न + अपृष्ट: (दीर्घसन्धि:) |
| चान्यायेन | = | च + अन्यायेन (दीर्घसन्धि:) |
| जानन्नपि | = | जानन् + अपि (व्यंजनसन्धि:) |
| जडवल्लोकमाचरेत् | = | जडवत् + लोकम् + आचरेत् (व्यंजनसन्धि) |
| वृद्धोपसेविन: | = | वृद्ध + उपसेविन: (गुणसन्धि:) |
| आयुर्विद्या | = | आयु: + विद्या (विसर्ग सन्धि:) |
| बन्धुर्वय: | = | बन्धु: + वय: (विसर्गसन्धि:) |
| यदुत्तरम् | = | यत् + उत्तरम् (व्यञ्जनसन्धि:) |
| रक्षार्थमायुष: | = | रक्षा + अर्थम् + आयुष: (दीर्घसन्धि:) |

| | | |
|---|---|---|
| आचार्यश्च | = | आचार्यः + च (विसर्ग-सन्धिः) |
| नार्तेनाम्यवमन्तव्याः | = | न + आर्तेन + अपि + अवमन्तव्याः (दीर्घसन्धिः, यण्सन्धिः) |
| विषादप्यमृतम् | = | विषात् + अपि + अमृतम् (व्यंजनसन्धिः, यण्सन्धिः) |
| बालादपि | = | बालात् + अपि (व्यञ्जनसन्धिः) |
| अमित्रादपि | = | अमित्रात् + अपि (व्यञ्जनसन्धिः) |
| सद्वृत्तममेध्यादपि | = | (सत् + वृत्तम् + अमेध्यात्अपि) (व्यञ्जनसन्धिः) |
| सदाचारवान् | = | सत् + आचारवान् (व्यञ्जनसन्धिः) |
| अनसूयश्च | = | अन् + असूयः + च (विसर्गसन्धिः) |
| शौचानामर्थशौचम् | = | शौचानाम् + अर्थशौचम् |

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| ब्रूयात् | = | $\sqrt{\text{ब्रूञ्}}$ विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| पृच्छतः | = | $\sqrt{\text{प्रच्छ्}}$ + शतृ, पञ्चमी/ षष्ठी, एकवचनम् |
| आचरेत् | = | आ + $\sqrt{\text{चर्}}$ विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| वर्धन्ते | = | $\sqrt{\text{वृध्}}$ लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| बुध्येत | = | $\sqrt{\text{बुध्}}$ विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |

| | | |
|---|---|---|
| निर्वर्त्य | = | निर् + √वृत् + ल्यप् |
| ग्राह्यम् | = | √ग्रह् + ण्यत्, नपुंसकलिङ्गम्, एकवचनम् |
| जानन् | = | √ज्ञा + शतृ, पुंल्लिङ्गम् |
| श्रद्धावान् | = | श्रद्धा + मतुप्, पुंल्लिङ्गम् |
| स्मृतम् | = | √स्मृ + क्त, नपुंसकलिङ्गम्, एकवचनम् |
| अवमनतव्याः | = | अव + √मन् + तव्यत् (स्त्री. / पुं.), बहुवचनम् |
| आचारवान् | = | आ + √चर् + घञ् + मतुप् |

## अभ्यासः

### मौखिकः

1. **पूर्णवाक्येन उत्तरत**

(क) कस्य चत्वारि वर्धन्ते ?

(ख) अभिवादनशीलस्य कानि चत्वारि वर्धन्ते ।

(ग) कति मान्यस्थानानि सन्ति ?

(घ) पञ्च मान्यस्थानानि कानि सन्ति ?

(ङ) कदा बुध्येत ?

2. **सुस्पष्टम् उच्चारयत**

| | | |
|---|---|---|
| ब्रूयात् | ब्रूयाताम् | ब्रूयुः |
| आचरेत् | आचरेताम् | आचरेयुः |
| भवेत् | भवेताम् | भवेयुः |

## 3. पठत

| | | |
|---|---|---|
| न मित्रम् | – | अमित्रम् |
| न मेध्यम् | – | अमेध्यम् |
| न असूया | – | अनसूया |
| न पृष्टः | – | अपृष्ट |
| न न्यायेन | – | अन्यायेन |
| न उचितम् | – | अनुचितम् |

## लिखितः

## 4. उदाहरणानुरूपं वाक्यानि रचयत

| | | |
|---|---|---|
| नित्यं | = | वयं नित्यं विद्यालयं गच्छामः । |
| पिता | = | |
| स्वस्थः | = | |
| काञ्चनम् | = | |
| जीवति | = | |
| रक्षार्थम् | = | |

## 5. सुमेलनं कुरुत

| | | |
|---|---|---|
| सदाचारः | = | श्रेष्ठः |
| मेधावी | = | कस्यचित् वंशस्य पूर्वपुरुषः |
| सुभाषितम् | = | समय-विभागः |
| पूर्वजः | = | सुन्दरं वचनम् |

| | | |
|---|---|---|
| गरीयः | = | सज्जनानां व्यवहारः |
| मुहूर्तः | = | यः कञ्चित् विलक्षणसंस्कारं धारयति |

### 6. प्रश्नानाम् उत्तराणि लिखत

(क) कल्याणकामिना के नावमन्तव्याः ?

(ख) कस्मात् अमृतं ग्राह्यम् ?

(ग) किं शौचं श्रेष्ठं स्मृतम् ?

(घ) कः शतं वर्षाणि जीवति ?

(ङ) अपृष्टः किन्न कुर्यात् ?

### 7. वर्णान् संयोज्य लिखत -

**यथा** व् + इ + त् + त् + अ + म् - वित्तम्

1. ब् + र् + आ + ह् + म् + अः - ..............................
2. म् + उ + ह् + ऊ + र् + त् + अः - ..............................
3. श् + र् + अ + द् + ध् + आ - ..............................
4. श् + ऋ + ङ् + ग् + आ + र् + अः - ..............................
5. उ + ज् + ज् + व् + अ + ल् + अः - ..............................

### 8. उदाहरणानुसारं पदानि पृथक् कुरुत -

| | | | | | |
|---|---|---|---|---|---|
| **यथा-** | सर्वेषामेव | - | सर्वेषाम् | + | एव |
| | लोकमाचरेत् | - | ..................... | + | ........................ |
| | रक्षार्थमायुषः | - | ..................... | + | ........................ |
| | वृत्तममेध्यात् | - | ..................... | + | ........................ |

प्रथममेव - ....................+ ........................

शौचानामर्थशौचम् - ....................+ ........................

**9. मञ्जूषाया: पदानि संयोज्य वाक्यानि रचयत -**

| विशाल:, गंगाया:, पूर्वभागे, मध्ये, तटे, गंगा, पर्वतानां । |
|---|

**यथा–** भारतस्य उत्तरभागे कश्मीरराज्यम् अस्ति ।

(क) भारतस्य .............................. वंगप्रदेश: अस्ति ।

(ख) विहारस्य .............................. गंगानदी प्रवहति ।

(ग) वंगोपसागरस्य .............................. उत्कलप्रदेश: अस्ति ।

(घ) .............................. तीरे वाराणसी अस्ति ।

(ङ) पाटलिपुत्रस्य उत्तरभागे .............................. प्रवहति ।

(च) शोणनद: अतीव .............................. वर्तते ।

(छ) हिमालय: .............................. राजा कथ्यते ।

**10. मञ्जूषात: क्रियापदानि चित्वा रिक्तस्थानानि पूरयत -**

| विराजते, चलत, भविष्यति निवसाम:, निवससि, आसन् |
|---|

**यथा** - वयं भारतवर्षे निवसाम: ।

(क) त्वं कस्मिन् ग्रामे .............................. ?

(ख) पाटलिपुत्रं गंगायास्तटे .............................. ।

(ग) राज्ञो दशरथस्य चत्वार: पुत्रा: ......................... ।

(घ) यूयं अस्माभि: सह विद्यालयं ......................... ।

(ङ) अस्माकं विद्यालये श्व: वार्षिकोत्सव:.................. ।

## योग्यता-विस्तारः

### पाठ से सम्बद्ध

प्राचीन काल से भारतीय संस्कृति में शिष्ट आचरण या सदाचार पर बल दिया गया है । इस देश की परम्परा में जिस व्यवहार से सामाजिक सामंजस्य बना रहे, दूसरे लोग प्रसन्नता का अनुभव करें तथा जो अनुकरणीय हो उसे सदाचार के अन्तर्गत रखा जाता था । विभिन्न पुराणों में दैनिक जीवन में पालने योग्य ऐसे नियमों की लम्बी-लम्बी सूचियाँ दी गयी हैं । भौतिक युग में उनमें कुछ हास्यास्पद या व्यङ्ग्य का पात्र भी बन गई हैं । किन्तु अधिकांश आचरण समय से खरे उतरे हैं । जैसे बड़े लोगों का सम्मान करना, सत्संगति, आर्थिक ऋजुता (ईमानदारी), सत्य का पालन, ज्ञान के प्रति उत्सुकता इत्यादि । इनको आज के नीतिशास्त्री "मानवमूल्य" मानते हैं ।

### पाठ में दिये गये पद्यों का मूल भाव निम्नांकित है -

श्लोक 1 -विद्वान् को सही समय और पात्र के समक्ष बोलना चाहिए ।

श्लोक 2 -अभिवादन एवं बड़ों की सेवा का सत्फल ।

श्लोक 3 -सम्माननीय वस्तुओं का तारतम्य-धन से लेकर विद्या तक ।

श्लोक 4 -प्रात:कालीन स्वास्थ्यप्रद कार्य ।

श्लोक 5 -संकट में भी तिरस्कार न करने योग्य व्यक्ति ।

श्लोक 6 -अच्छी वस्तुओं के उद्‌भव स्थान की चिन्ता नहीं करनी चाहिए ।

श्लोक 7 -सदाचारी की प्रशंसा ।

श्लोक 8 -धनविषयक पवित्रता का महत्त्व ।

## व्याकरण से सम्बद्ध

संख्यावाचक शब्द (76 से 100 तक) – पूर्व पाठ में दिये गये संकेतों के अनुसार इन संख्याओं का भी प्रयोग होता है । कुछ संख्याओं के दो-दो रूप होते हैं, विशेषरूप से द्वि और अष्ट से जुड़ने वाले शब्द तथा शून्ययुक्त संख्या के पूर्व के शब्द । इनपर ध्यान देना चाहिए । यद्यपि कोई एक रूप ही लोकप्रिय होता है तथापि बाद की भाषाओं में विकास की दृष्टि से दोनों विकल्पों का महत्त्व है ।

| | | |
|---|---|---|
| 76 | = | षट्सप्तति: |
| 77 | = | सप्तसप्तति: |
| 78 | = | अष्टासप्तति:/अष्टसप्तति: |
| 79 | = | नवसप्तति: / एकोनाशीति: |
| 80 | = | अशीति: |
| 81 | = | एकाशीति: |
| 82 | = | द्व्यशीति: |
| 83 | = | त्र्यशीति: |
| 84 | = | चतुरशीति: |
| 85 | = | पञ्चाशीति: |
| 86 | = | षडशीति: |
| 87 | = | सप्ताशीति: |
| 88 | = | अष्टाशीति: |

| | | |
|---|---|---|
| 89 | = | नवाशीतिः / एकोननवतिः |
| 90 | = | नवतिः |
| 91 | = | एकनवतिः |
| 92 | = | द्वानवतिः / द्विनवतिः |
| 93 | = | त्रयोनवतिः / त्रिनवतिः |
| 94 | = | चतुर्नवतिः |
| 95 | = | पञ्चनवतिः |
| 96 | = | षण्णवतिः |
| 97 | = | सप्तनवतिः |
| 98 | = | नवनवतिः/एकोनशतम् |
| 100 | = | शतम् |

QQQ

त्रयोदशः पाठः

# रविषष्ठी-व्रतोत्सवः

## (सन्धि, विभक्ति)

(मूलतः दक्षिण बिहार में मनाया जाने वाला रविषष्ठी व्रतोत्सव 'छठ पर्व' के नाम से अधिक प्रसिद्ध है। आजकल इसे उन सभी स्थानों में मनाते हैं जहाँ बिहार के लोग बस गये हैं। यह मुख्य रूप से कार्तिक में तथा गौण रूप से चैत्र में शुक्ल पक्ष की षष्ठी-सप्तमी तिथियों को मनाया जाता है। वैसे इसकी तैयारी कई दिन पहले से होने लगती है। विभिन्न जलाशयों के आस-पास व्रत करने वाले स्त्री-पुरुष सायंकाल तथा प्रातःकाल जब सूर्य को अर्घ्य देने जाते हैं तो विशाल मेले का दृश्य होता है। यह उत्सव बिहार की विशेष पहचान है। प्रस्तुत पाठ में इसका परिचय दिया गया है।)



प्राकृतिकपदार्थेषु सूर्यः सर्वाधिकः तेजस्वी आरोग्यप्रदश्च मन्यते। अनेन सर्वे जीवाः प्राणिनः वनस्पतयः प्राणान् लभन्ते। अस्य उपयोगितां विचार्य देवरूपेण इमं पूजयन्ति जनाः। प्राचीनकालात् सूर्यः भगवान् इति पूज्यते। सूर्यस्य पूजने कश्चित् पुरोहितः मध्यस्थः न अपेक्षितः भवति इति अस्य विशिष्टता वर्तते।

कार्तिको मासः वर्षाशीतयोः मध्ये अवस्थितः । एवमेव चैत्रो मासः शीतग्रीष्मयोः सन्धिकालः । सन्धिस्थितयोः अनयोः मासयोः अनेके रोगाः ज्वरकासादयः प्रभवन्ति । तत्र रोगाणां विनाशाय उपवासः आवश्यकः । उपवासः रविषष्ठीव्रते अनिवार्यतया जायते । अतः अस्य व्रतस्य वैज्ञानिकं महत्त्वं वर्तते । अपि च चैत्रमासे रवितप्तानि अन्नानि पच्यन्ते गोधूमादीनि । तेषां प्रयोगः अस्य व्रतस्य नैवेद्याय भवति । अतः चैत्रकालिकः व्रतोत्सवः ग्रामेषु प्रसिद्धः । कार्तिककालिकः व्रतोत्सवस्तु नगरेषु बहुधा आयोजितः । सर्वथापि जलाशयः अस्मिन् व्रतोत्सवे आवश्यकः तडागो वा नदी वा । सागरतटेषु स्थिताः जनाः सागरेऽपि स्नात्वा अर्घ्यदानं कुर्वन्ति ।



यस्मिन् मासे रविषष्ठीव्रतोत्सवः आयोजितः भवति परिवारे तस्य प्रथमदिवसादेव परिवारे अभक्ष्याः पदार्थाः वर्जिताः भवन्ति । शुक्लपक्षस्य चतुर्थदिवसः **संयतः** नाम क्रियाकलापः । तदा स्नात्वा पवित्रं सिद्धान्नम् ओदनादिकं पचन्ति, इष्टजनानपि भोजयन्ति व्रतिनः । वस्तुतः तस्मादेव दिवसात् संयमः प्रारभते । पञ्चमदिवसे एकवारमेव व्रतिनः पायसरोटिकयोः सूर्यास्तादनन्तरं भोजनं कुर्वन्ति ।

इष्टजनानपि भोजयन्ति । ततः षष्ठदिवसे सम्पूर्णदिवसम् अनाहाराः व्रतिनः सायंकाले शूर्पेषु फलानि धारयित्वा दीपकं च प्रज्वाल्य सूर्याय अर्घ्यदानं कुर्वन्ति । इदं दृश्यमतीव पवित्रं मनोहरं च । रात्रौ भूमौ शयित्वा व्रतिनः पुनः प्रातःकाले सप्तमदिवसे उदीयमानाय सूर्याय स्नानपूर्वकम् अर्घ्यदानं पूर्ववत् कुर्वन्ति। तदनन्तरं **पारणं** क्रियते । व्रतिनः स्वयं प्रसादग्रहणं कुर्वन्ति अपरेभ्यश्च प्रयच्छन्ति ।

इत्थं रविषष्ठी-व्रतोत्सवः सूर्योपासनायाः महत्त्वपूर्णः अवसरः । वस्तुतः अत्र षष्ठीदेवीपूजनं सन्तानलाभाय, सूर्यपूजनम् आरोग्याय इति द्वयोः पूजनयोः मिश्रणरूपः व्रतोत्सवः । क्रमशः अस्य प्रसारः वर्धमानः दृश्यते ।

**शब्दार्थः**

| | | |
|---|---|---|
| **प्राकृतिकपदार्थेषु** | = | प्राकृतिक पदार्थों में |
| **सर्वाधिकः** | = | अत्यधिक, सबसे बढ़कर |
| **तेजस्वी** | = | तेजस्वी, आत्मबल से युक्त, ओज से युक्त, ऊर्जावान् (व्यक्ति) |
| **आरोग्यप्रदः** | = | नीरोगता प्रदान करने वाला |
| **मन्यते** | = | माना जाता है |
| **लभन्ते** | = | प्राप्त करते हैं |
| **विचार्य** | = | विचार करके, सोचकर |
| **देवरूपेण** | = | देवता के रूप में |
| **पूजयन्ति** | = | पूजते हैं |
| **प्राचीनकालात्** | = | पुराने समय से |

| | | |
|---|---|---|
| पूजने | = | पूजा करने के समय में |
| कश्चित् | = | कोई |
| मध्यस्थः | = | बीच में रहने वाला, बिचौलिया |
| अपेक्षितः | = | आवश्यक |
| शीतः | = | जाड़ा |
| अवस्थितः | = | स्थित |
| एवमेव (एवम् + एव) | = | इसी प्रकार, ऐसा ही |
| ग्रीष्मः | = | गर्मी |
| सन्धिकालः | = | जोड़नेवाला / बीच वाला समय |
| अनयोः | = | दोनों में |
| ज्वरकासादयः | = | बुखार, खाँसी आदि |
| प्रभवन्ति | = | उत्पन्न होते हैं |
| विनाशाय | = | विनाश के लिए |
| चैत्रमासे | = | चैत महीने में |
| अन्नानि | = | अन्न |
| पच्यन्ते | = | पकाये जाते हैं |
| रवितप्तानि | = | धूप में सुखाये हुए |
| पच्यन्ते | = | पकाये जाते हैं |
| गोधूमः | = | गेहूँ |

| | | |
|---|---|---|
| **नैवेद्याय** | = | अर्पण के लिए |
| **ग्रामेषु** | = | गाँवों में |
| **कार्तिककालिकः** | = | कार्तिक माह वाला |
| **नगरेषु** | = | नगरों / शहरों में |
| **बहुधा** | = | प्रायः |
| **सर्वथा** | = | सब तरह से |
| **तडागः** | = | तालाब |
| **सागरतटेषु** | = | समुद्र के किनारे |
| **स्नात्वा** | = | स्नान करके |
| **अर्घ्यदानम्** | = | चढ़ावा, पूजन-सामग्री का दान |
| **यस्मिन्** | = | जिसमें |
| **अभक्ष्याः** | = | नहीं खाने योग्य |
| **वर्जिताः** | = | मना किये हुए |
| **तदा** | = | तब |
| **सिद्धान्नम्** | = | पका हुआ अन्न |
| **ओदनादिकम्** (ओदन+आदिकम्) | = | भात आदि |
| **इष्टजनानपि** (इष्टजनान्+अपि) | = | प्रिय लोगों को भी |
| **भोजयन्ति** | = | खिलाते हैं |

| | | |
|---|---|---|
| प्रारभते | = | शुरू होता है |
| पायसम् | = | खीर |
| रोटिका | = | रोटी |
| अनन्तरम् | = | बाद में, पश्चात् |
| कुर्वन्ति | = | करते हैं |
| ततः | = | इसके बाद |
| अनाहाराः | = | बिना भोजन किए |
| धारयित्वा | = | रखकर |
| प्रज्वाल्य | = | जला कर |
| शयित्वा | = | सोकर |
| उदीयमानाय | = | उगते हुए को |
| पूर्ववत् | = | पहले की तरह |
| क्रियते | = | किया जाता है |
| अपरेभ्यः | = | दूसरों को |
| प्रयच्छन्ति | = | देते हैं |
| इत्थम् | = | इसप्रकार |
| वर्धमानः | = | बढ़ता हुआ |
| दृश्यते | = | दिखलायी देता है, देती है |

## व्याकरणम्

### सन्धिविच्छेदः

| | | |
|---|---|---|
| आरोग्यप्रदश्च | = | आरोग्यप्रदः + च (विसर्गसन्धिः) |
| कश्चित् | = | कः + चित् (विसर्गसन्धिः) |
| एवमेव | = | एवम् + एव |
| व्रतोत्सवः | = | व्रत + उत्सवः (गुणसन्धिः) |
| तस्मादेव | = | तस्मात् + एव (व्यञ्जनसन्धिः) |
| एकवारमेव | = | एकवारम् + एव |
| सूर्यास्तादनन्तरम् | = | सूर्यास्तात् + अनन्तरम् (व्यञ्जनसन्धिः) |
| अपरेभ्यश्च | = | अपरेभ्यः + च (विसर्गसन्धिः) |

### प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| मन्यते | = | √मन् लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| लभन्ते | = | √लभ् लट्प्रकारः, प्रथमपुरुषः, बहुवचनम् |
| विचार्य | = | वि + √चर् + ल्यप् |
| पूजयन्ति | = | √पूज् लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| पूज्यते | = | √पूज् + यक् (य), कर्मवाच्यम्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |

| | | |
|---|---|---|
| अवस्थितः | = | अव + √स्था + क्त, पुंल्लिङ्गम्, एकवचनम् |
| प्रभवन्ति | = | प्र + √भू लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| प्राप्नोति | = | प्र + √आप् लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| पच्यन्ते | = | √पच् + यक्, कर्मवाच्यम्, प्रथमपुरुषः, बहुवचनम् |
| प्रसिद्धः | = | प्र + √सिध् + क्त, पुंल्लिङ्गम्, एकवचनत् |
| आयोजितः | = | आ + √युज् + णिच् + क्त, पुंल्लिङ्गम्, एकवचनम् |
| स्नात्वा | = | √स्ना + क्त्वा |
| कुर्वन्ति | = | √कृ लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| वर्जिताः | = | √वृज् + क्त, (पुं० / स्त्री.), बहुवचनम् |
| स्नात्वा | = | √स्ना + क्त्वा |
| भोजयन्ति | = | √भुज् + णिच् लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| प्रारभते | = | प्र + आ + √रभ् लट्लकारः,प्रथमपुरुषः,एकवचनम् |
| शयित्वा | = | √शीङ् + क्त्वा |
| प्रयच्छन्ति | = | प्र + √दाण् लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| वर्धमानः | = | √वृध् + शानच्, पुंल्लिङ्गम्, एकवचनम् |
| दृश्यते | = | √दृश् +यक्(य्),कर्मवाच्यम्,प्रथमपुरुषः, एकवचनम् |

## अभ्यासः

### मौखिकः

1. **अधोलिखितानां पदानाम् उच्चारणं कुरुत –**

   प्राकृतिकपदार्थेषु, तेजस्वी, आरोग्यप्रद: वर्षाशीतयो:, शीतग्रीष्मयो: ज्वरकासादय:, रविषष्ठीव्रते, अनिवार्यतया, गोधूमादीनि, नैवेद्याय, व्रतोत्सवस्तु, सागरेऽपि, रविषष्ठीव्रतोत्सव:, अभक्ष्या:, पायसरोटिकयो:, सूर्यास्तादनन्तरं, प्रज्वाल्य, अपरेभ्यश्च ।

2. **निम्नलिखितानां पदानाम् अर्थं वदत –**

   प्राकृतिकपदार्थेषु, तेजस्वी, आरोग्यप्रद:, ज्वरकासादय:, गोधूमादीनि, नैवेद्याय, स्नात्वा, अर्घ्यदानम्, अभक्ष्या:, वर्जिता, इष्टजनान्, तस्मात्, पायसरोटिकयो:, प्रज्वाल्य, अपरेभ्य:, वर्धमान: ।

3. **एतेषु किं सत्यम् असत्यं वा, वदत –**

   (क) प्राकृतिकपदार्थेषु सूर्य: आरोग्यप्रद: मन्यते ।

   (ख) सूर्य: देवरूपेण पूज्यते ।

   (ग) कार्तिको मास: शीतवसन्तयो: मध्ये अवस्थित: ।

   (घ) चैत्रो मास: शीतग्रीष्मयो: सन्धिकाल: ।

4. बिहार में मनाये जानेवाले किसी एक पर्व का वर्णन अपने शब्दों में कीजिए ।

### लिखित:

1. **एकपदेन उत्तरत –**

   (क) प्राकृतिकपदार्थेषु सर्वाधिक: तेजस्वी आरोग्यप्रदश्च क: ?

(ख) कार्तिको मास: कस्मात् मासात् पश्चात् आगच्छति ?

(ग) रोगाणां विनाशाय क: आवश्यक: ?

(घ) रविषष्ठी-व्रतोत्सव: कदा मन्यते ?

(ङ) सूर्योपासनाया: महत्त्वपूर्ण: अवसर: क: ?

## 2. पूर्णवाक्येन उत्तरत -

(क) रविषष्ठीव्रतोत्सव: अन्येन केन नाम्ना ज्ञायते ?

(ख) रविषष्ठीव्रतोत्सव: कदा आयोजितो भवति ?

(ग) छठ-व्रतोत्सवे कस्य पूजा भवति ?

(घ) रविषष्ठीव्रतोत्सव: कार्तिकमासस्य कस्मिन् दिवसे मन्यते ?

(ङ) कार्तिकमासस्य शुक्लपक्षस्य सप्तमदिवसे किं भवति ?

## 3. उदाहरणानुसारं लिखत

**यथा -** एकवचनम् बहुवचनम्

**मन्यते** **मन्यन्ते**

(क) लभते ....................................

(ख) वर्तते ....................................

(ग) प्रभवति ....................................

(घ) भवति ....................................

(ङ) करोति ....................................

(च) प्रारभते ....................................

(छ) भोजयति ....................................

(ज) प्रयच्छति ....................................

(झ) पश्यति ....................................

**4. उदाहरणानुसारेण विभक्तिनिर्णयं कुरुत –**

**यथा** – पदार्थेषु सप्तमी विभक्तिः

(क) वनस्पतयः ....................................

(ख) प्राचीनकालात् ....................................

(ग) वर्षाशीतयोः ....................................

(घ) रोगाणाम् ....................................

(ङ) रविषष्ठीव्रते ....................................

(च) व्रतस्य ....................................

(छ) नैवेद्याय ....................................

(ज) भूमौ ....................................

(झ) सूर्योपासनायाः ....................................

**5. मेलनं कुरुत –**

(क) सूर्यः 1. ऊर्जावान्

(ख) तेजस्वी 2. रविः

| | | | |
|---|---|---|---|
| (ग) | अनिवार्यः | 3. | प्रायः |
| (घ) | बहुधा | 4. | अपरिहार्यः |
| (ङ) | स्नात्वा | 5. | विस्तारः |
| (च) | प्रसारः | 6. | स्नानं कृत्वा |

**6. कोष्ठात् शब्दं चित्वा रिक्तस्थानानि पूरयत –**

(क) प्राकृतिकपदार्थेषु ……………… सर्वाधिकः तेजस्वी आरोग्यप्रदश्च मन्यते। (सूर्यः/चन्द्रः)

(ख) वर्षाशीतयोः मध्ये अवस्थितः ……………… मासः। (कार्तिकः / चैत्रः)

(ग) कार्तिकमासे अभक्ष्याः पदार्थाः ………… भवन्ति। (वर्जिताः/ अवर्जिताः)

(घ) 'छठ' इति व्रतोत्सवे ……………… अर्घ्यदानं दीयते (सूर्याय / चन्द्राय)

(ङ) रविषष्ठीव्रतोत्सवस्य ……………… महत्त्वं वर्तते (वैज्ञानिकं / आर्थिकं)

**7. निम्नलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत –**

(क) आरोग्यप्रदः + च = ……………………………………………………

(ख) व्रत + उत्सवः = …………………………………………………
……..

(ग) …………………… + ………………………… = तस्मादेव

(घ) कः + चित् = ………………………………………………

(ङ) ……………………… + ……………………………… = सूर्यास्तः

**8. शब्दान् दृष्ट्वा लिखत –**

ज्योत्स्ना, तेजस्वी, अनिवार्यतया, नैवेद्याय, व्रतोत्सवः, सागरेऽपि,

पायसरोटिकयोः, प्रज्वाल्य, अपरेभ्यः ।

9. वर्गप्रहेलीतः धातुरूपं निस्सारयत -

| | | | | | |
|---|---|---|---|---|---|
| ति | ह | स | थः | न्ति | मः |
| ह | स | सि | ह | सा | मि |
| स | ति | ह | स | ध | ह |
| न्ति | ह | स | तः | सा | सा |
| ह | सा | मः | ह | मः | वः |

10. संस्कृते अनुवदत -

(क) रविषष्ठव्रतोत्सव बिहार का एक प्रसिद्ध पर्व है ।

(ख) यह मुख्यतः कार्तिक महीना में मनाया जाता है ।

(ग) प्राकृतिक पदार्थों में सूर्य सर्वाधिक रोगविनाशक माना जाता है ।

(घ) कार्तिक माह वर्षा और शीतऋतु के मध्य स्थित है ।

11. अधोलिखित-तद्भव-शब्दानां कृते पाठात् चित्वा संस्कृतपदानि लिखत -

**यथा**- सूरज सूर्यः

माह ..................

कातिक ..................

गेहूँ ..................

तालाब ..................

सूप ..................

रात ..................

छठी ....................

## योग्यता-विस्तारः

सूर्य की पूजा वैदिक काल से भारत में होती रही है। प्रारम्भ में सूर्य को प्राकृतिक देवताओं में सबसे अधिक दृश्य होने के कारण मान्यता मिली। उन दिनों सूर्य को भी अन्य वैदिक देवताओं के समान यज्ञों में आहुतियाँ दी जाती थीं। कालक्रम से पुराणों का विकास हुआ तथा देवताओं से सम्बद्ध आख्यान बनने लगे। ज्योतिष में तिथियों और नक्षत्रों से सम्बद्ध कथाएँ भी प्रचलित हुईं। बहुदेववाद का व्यापक परिवेश पौराणिक युग में दिखाई पड़ने लगा। सूर्य से सम्बद्ध भविष्यमहापुराण तथा साम्ब उपपुराण विकसित हुए जिनमें सूर्यपूजा का व्यापक विवरण दिया गया। सप्तमी तिथि के देवता के रूप में सूर्य को जोड़ा गया। इसके पीछे वैज्ञानिक कारण था कि सूर्य की किरणों में सात रंग होते हैं, इसलिए सूर्य को सात घोड़ों के रथ पर चलने वाला कहा गया। हिन्दू पञ्चांगों में रविवार को सप्तमी तिथि पड़ने से इसे -'भानुसप्तमी' कहा जाता है। वैसे रविवार का दिन सूर्य से ही सम्बद्ध है। इस दिन बहुत से श्रद्धालु सूर्य के सम्मान में अलवण (नमक न खाने का) व्रत करते हैं। सूर्यपूजा का पुनरुद्धार प्रायः ईसा की प्रथम शताब्दी में दक्षिण बिहार में किया गया। वहाँ सूर्य से सम्बद्ध कई तीर्थस्थानों एवं मंदिरों का निर्माण राजाओं की सहायता से हुआ। औरंगाबाद जिले में देव का सूर्यमन्दिर, नालन्दा के निकट बड़गाँव का मन्दिर, औंगारी का सूर्यमन्दिर, पुण्यार्क (पण्डारक) का मन्दिर तथा अन्य कई सूर्यमन्दिर सूर्यपूजा के प्रसिद्ध स्थल

हैं।

रविषष्ठीव्रतोत्सव कार्तिक तथा चैत्र–दो महीनों में चार दिनों का पर्व है । मुख्यतः षष्ठी देवी की पूजा की परम्परा सन्तानलाभ के लिए विकसित हुई थी । उसे सूर्यसप्तमी से जोड़कर इस व्रतोत्सव में संयम की भव्य कल्पना की गयी। वस्तुतः उपर्युक्त दोनों महीनों में ऋतुपरिवर्तन के कारण रोग आदि बाधाएँ सम्भाव्य हैं इसलिए उपर्युक्त धार्मिक कार्यक्रम के अन्तर्गत उपवास और संयम के नियम जुड़ जाने से इन बाधाओं पर अद्भुत नियंत्रण होता है । इसलिए स्वास्थ्य–विज्ञान को धर्म के साथ जोड़कर यह आस्था का महान् उत्सव प्रचलित हुआ । आज के प्रसारवादी युग में इस उत्सव को दूर–दूर तक फैलने में देर नहीं लगी है । इसमें मुख्य कार्य पवित्र होकर सूर्य को सायंकाल और प्रातःकाल अर्घ्य देना है जो किसी जलाशय के निकट होता है । बिहार का इसे सबसे बड़ा और भव्य पर्व कहें तो इसमें आश्चर्य नहीं । सूर्य को अर्घ्य देने का मन्त्र इस प्रकार है –

एहि सूर्य ! सहस्रांशो ! तेजोराशे ! जगत्पते ! ।
अनुकम्पय मां देव ! गृहाणार्घ्यं नमोऽस्तु ते ।।

QQQ

## चतुर्दशः पाठः

# कृषिगीतम्

## (विशेषण-विशेष्य)

(प्रस्तुत पाठ अभिनव संस्कृत गीत है जो कुछ भजनों की धुन में रचा गया है । इसमें भारतीय किसानों की स्थिति का वर्णन है । किसान बहुत परिश्रम करके रूखी धरती को हरी-भरी वसुन्धरा में बदल देते हैं। वह मानो नये परिधान धारण कर लेती है । किसानों को यह चिन्ता है कि उनके परिश्रम से उत्पन्न सस्य सम्पदा का उपभोग करने का अवसर उन्हें नहीं मिलता है । उनके अनाज ऋण चुकाने के लिए बिचौलियों के हाथों सस्ते दामों में बेच दिये जाते हैं। ये बिचौलिए उन्हें बाजारों में अधिक मूल्य पर बेचते हैं और किसान निर्धन का निर्धन ही रह जाता है । उसकी अशिक्षा इसका कारण है, उसके पास सीधा बाजार में जाने का साधन नहीं । फिर भी सीधा-सादा किसान धरती के साथ अपने जुड़ाव के कारण प्रसन्न है। ऋतुएँ उसके लिए वरदान हैं ।)



वयं गायाम कृषिगीतं धरा परिधानयुक्तेयम् ।

1. तदासीद् या विकृतवेषा कुरूपा निर्जला चेयम् ।
   इदानीं नः श्रमेणाप्ता धरा परिधानयुक्तेयम् ।।

2. समेषां चिन्तयास्माकं कथञ्चित् कर्मणा फलितम् ।
बहूनां कर्षकाणां नः श्रमैः सस्यं समाकलितम् ।।

3. परं ते मध्यमाः सर्वे समेषामन्नराशीनाम् ।
क्रयं कृत्वाल्पमूल्येन, पुनर्नो निर्धनान् कुर्युः ।।

4. धराऽस्माकं भवेत्कामं न चान्नं नो हितायेदम् ।
वयं गायाम कृषिगीतं तथापीत्थं सुखायेदम् ।।

5. ऋतूनां कष्टमाघातैः वयं सर्वे समभ्यस्ताः ।
शरीरे नास्ति परिधानं कृषिः परिधानयुक्तेयम् ।।

6. सुखं सन्तोषवाचा यत् प्रशस्यं कल्पयामस्तत् ।
समेषामन्नभाजां सा कृषिः सुखलब्धये भूयात् ।।

**अन्वयः** – 1. तदा या इयम् विकृतवेषा कुरूपा निर्जला च आसीत् (सा इयं) धरा इदानीं नः श्रमेण (हरित) परिधानयुक्ता आप्ता ।

2. समेषां चिन्तया अस्माकं कर्मणा कथंचित् फलितम् । नः बहूनां कर्षकाणां श्रमैः सस्यं समाकलितम् ।

3.परं ते सर्वे मध्यमाः अल्पमूल्येन समेषाम् अन्नराशीनां क्रयं कृत्वा पुनः नः निर्धनान् कुर्युः।

4. कामं धारा अस्माकं भवेत्, इदम् अन्नं च नः हिताय न (अस्ति)। तथापि वयं कृषिगीतं गायाम, इत्थम् इदं सुखाय (भवति)।

5. वयं सर्वे ऋतूनाम् आघातैः कष्टं (प्रति) समभ्यस्ताः । शरीरे परिधानं नास्ति । (किन्तु) इयं कृषिः परिधानयुक्ता ।

6. समेषाम् अन्नभाजां सन्तोषवाचा यत् सुखं तत् प्रशस्तं (वयं) कल्पयामः। सा कृषिः सुखलब्धये भूयात् ।

## शब्दार्थः

| | | |
|---|---|---|
| धरा | – | धरती |
| परिधानम् | – | पहनावा |
| विकृतवेषा | – | खराब वेशभूषा वाला |
| समेषाम् | – | सब का / की / के |
| कथञ्चित् | – | किसी तरह |
| कर्षकाणाम् | – | किसानों का |
| सस्यम् | – | फसल |
| समाकलितम् | – | प्राप्त हुआ |
| मध्यमाः | – | बीच वाले, बिचौलिये |
| नः | – | हमारा / री / रे |
| कामम् | – | निश्चय ही, भले ही, यद्यपि |
| आघातैः | – | आघातों / चोटों से |
| समभ्यस्ताः | – | अभ्यस्त, आदी |
| प्रशस्यम् | – | अच्छा, प्रशंसनीय |
| कल्पयामः | – | करते हैं, कर सकते हैं (हमलोग) |
| सुखलब्धये | – | सुख पाने के लिए |
| अन्नभाजाम् | – | अन्न खाने वालों का |

## व्याकरणम्

### सन्धि-विच्छेद :

| | | |
|---|---|---|
| तदासीत् | – | तदा + आसीत् (दीर्घसन्धिः) |
| चेयम् | – | च + इयम् (गुणसन्धिः) |
| श्रमेणाप्ता | – | श्रमेण + आप्ता (दीर्घसन्धिः) |
| परिधानयुक्तेयम् | – | परिधानयुक्ता + इयम् (गुणसन्धिः) |
| चिन्तयास्माकम् | – | चिन्तया + अस्माकम् (दीर्घसन्धिः) |
| कृत्वाल्पमूल्येन | – | कृत्वा + अल्पमूल्येन (दीर्घसन्धिः) |
| पुनर्नो (पुनर्नः) | – | पुनः + नः (विसर्गसन्धिः) |
| धराऽस्माकम् | – | धरा + अस्माकम् (दीर्घसन्धिः) |
| चान्नम् | – | च + अन्नम् (दीर्घसन्धिः) |
| हितायेदम् | – | हिताय + इदम् (गुणसन्धिः) |
| नास्ति | – | न + अस्ति (दीर्घसन्धिः) |
| कल्पयामस्तत् | – | कल्पयामः + तत् (विसर्गसन्धिः) |
| तथापीत्थम् | – | तथा + अपि + इत्थम् (दीर्घसन्धिः) |

### प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| गायामः | – | √गै + लोट्लकारः, उत्तमपुरुषः, बहुवचनम् |
| आसीत् | – | √अस् + लङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| कृत्वा | – | √कृ + क्त्वा |

| | | |
|---|---|---|
| कुर्युः | - | $\sqrt{\text{कृ}}$ + विधिलिङ्लकारः, प्रथमपुरुषः, बहुवचनम् |
| भवेत् | - | $\sqrt{\text{भू}}$ + विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| अस्ति | - | $\sqrt{\text{अस्}}$ + लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| कल्पयामः | - | $\sqrt{\text{कृप्}}$ + णिच्, लट्लकारः, उत्तमपुरुषः, बहुवचनम् |
| भूयात् | - | $\sqrt{\text{भू}}$ + लोट्लकारः प्रथमपुरुषः, एकवचनम् |

## अभ्यासः

### मौखिकः

1. गीतं सस्वरं गायत।
2. स्वमातृभाषायां कृषिगीतं श्रावयत।

### लिखित :

**3. गीतांशेषु रिक्तस्थानानि स्मरणेन पूरयत -**

समेषां ................................ कथंचित् .............................................. ।

धराऽस्माकं भवेत्कामं ............................................... ।

वयं गायाम ................................................ सुखायेदम् ।

ऋतूनां ................................................ वयं सर्वे ................................ ।

**4. अधोलिखितानां पदानां लिङ्गं विभक्तिं वचनं च लिखत -**

| | पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| यथा- | कर्षकाणाम् | पुँल्लिङ्गम् | षष्ठी | बहुवचनम् |
| | शरीरे | ................ | ................ | ................ |
| | सुखाय | ................ | ................ | ................ |

| | | | |
|---|---|---|---|
| कर्मणा | ................ | ................ | ................ |
| आघातैः | ................ | ................ | ................ |
| उपलब्धये | ................ | ................ | ................ |

**5. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) तदा धरा विकृतवेषा आसीत् ।

(ख) इदानीं धरा परिधानयुक्ता अस्ति ।

(ग) कर्षकाणां श्रमैः सस्यं प्राप्यते ।

(घ) वयं कृषिगीतं गायाम ।

(च) कर्षकाणां कृषिकर्म अस्माकं सुखाय भवति ।

**6. निम्नवाक्येषु अव्ययपदानि चित्वा लिखत – तदा**

**यथा** – तदा वसुधा कुरूपा आसीत् । ..............तदा..............

(क) अस्माकं श्रमेण इदानीं धरा श्यामला अस्ति । ................................

(च) कर्षकाणां परिश्रमः कथंचित् सफलो जातः । ..................................

(ट) परं मध्यमाः अल्पमूल्येन अन्नं क्रीणन्ति । ..................................

(त) ते अस्मान् पुनः निर्धनान् कुर्वन्ति । ..........................................

(प) वसुन्धरा सुरूपा सजला च वर्तते । ..........................................

**7. समुचितं विपरीतार्थकपदं चित्वा मेलयत –**

| | |
|---|---|
| इदानीम् | बहूनाम् |
| निर्जला | इदम् |
| दुःखाय | केषाञ्चित् |
| अल्पानाम् | तदा |
| समेषाम् | निर्धनान् |
| धनिनः | सजला |
| तत् | सुखाय |

8. **कोष्ठात् पदानि चित्वा वाक्यानि पूरयत-**

मिलति, गङ्गाया:, वर्तते, हिमालयात्, देशस्य

विहारस्य राजधानी पाटलिपुत्रम् ........................ । इदं नगरं ................ तटे अवस्थितमस्ति । गंङ्गा अस्माकं ................ पवित्रतमा नदी वर्तते । इयं ................ नि:सृत्य वङ्गोपसागरे ................ ।

9. **निम्नलिखितम् अनुच्छेदं पठित्वा प्रश्नानां निर्माणं कुरुत**

भारतवर्षं कृषिप्रधान: देश: वर्तते । अत्र षट् ऋतव: भवन्ति । वसन्त: ऋतूनां राजा कथ्यते । विविधेषु ऋतुषु विविधानि सस्यानि फलानि च उत्पद्यन्ते । अत्रत्या धरा सर्वदा सस्यश्यामला भवति । कृषिकाश्च परिश्रमिण: सन्ति ।

**यथा** - भारतवर्षं कीदृश: देश: वर्तते ?

..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

## योग्यता-विस्तार:

इस नवगीत की रचना **प्रो. उमाशंकर शर्मा 'ऋषि'** ने की है । इसका लयपूर्वक गान सम्भव है जिसे कक्षाओं में बताया जा सकता है ।

यह एक विडम्बना है कि सबको भोजन देनेवाला भारतीय किसान स्वयं प्राय: भूखा रहता है । पृथ्वी को दिव्य परिधान से विभूषित करने वाला किसान स्वयं आवश्यक वस्त्र से भी वञ्चित रहता है । किसान कई प्रकार के हैं । बड़े-बड़े खेतों के स्वामी, ट्रैक्टर आदि उपकरणों से खेती करने वाले बहुत सम्पन्न हैं। किन्तु कुछ किसान ऐसे भी हैं जो दूसरों के स्वामित्व वाले खेतों में दैनिक मजदूरी करते हैं । प्रस्तुत

कृषिगीत में ऐसे ही दीन-हीन किसानों का वर्णन है । संतोष की अद्‌भुत मूर्ति ऐसा किसान विचारों से बहुत ईमानदार है । इसे वह अपनी नियति मानकर संतुष्ट रहता है, किसी का कुछ नहीं बिगाड़ता । इधर कुछ वर्षों में राजनीति का खेल खेलने वालों ने उसमें आक्रोश उत्पन्न करने का प्रयास किया है । इसे किसानों की आर्थिक दशा को सुधार कर दूर किया जा सकता है किन्तु इसके लिए राजनेताओं में दृढ़ इच्छाशक्ति और स्वस्थ आर्थिक नीति के संचालन की क्षमता होनी चाहिए ।

किसान सब कुछ देखते हुए भी इसलिए प्रसन्न है कि उसके परिश्रम से धरती सब को भोजन देती है, और वह स्वयं भी सुन्दर रूप धारण कर लेती है ।

अन्तरा 1 – कुरूप, निर्जल धरती को किसान के श्रम से हरा-भरा बनाना ।

अन्तरा 2 – सभी किसानों के परिश्रम, कर्म तथा चिन्ता से फसल की प्राप्ति ।

अन्तरा 3 – मध्यस्थ लोगों के कारण अल्पमूल्य पर अन्नराशि का क्रय एवं किसानों का निर्धन ही रह जाना।

अन्तरा 4 – अन्न भले ही किसानों के हित में न हो फिर भी उन्हें सुख है, वे कृषिगीत गाते हैं ।

अन्तर 5 – सभी ऋतुएँ के आघातों को सहते हुए उनका नग्नप्राय शरीर अभ्यस्त हो गया है । स्वयं परिधान नहीं किन्तु खेत परिधानयुक्त हैं ।

अन्तरा 6 – सभी उपभोक्ताओं के लिए कृषि सुखकारक हो, यही किसान को संतोष है ।

QQQ